# ॥ श्रीदत्तस्तवराज स्तोत्रम् ॥

श्रीशुक उवाच

महादेव महादेब देवदेव महेश्वर ।

देव देव स्तवं दिव्यं श्रोतुमिच्छाम्यहं प्रभो ॥

दत्तस्य वद माहात्म्यं देवदेव दयानिधे ।

दत्तात्परतरं नास्ति पुरा व्यासेन कीर्तितम् ॥

जगद्गुरुर्जगन्नाथो गीयते नारदादिभिः ।

तत्सर्वं भ्रूहि मे देव करुणाकर शङ्कर ॥

श्रीमहादेव उवाच

शृणु दिव्यं व्यासपुत्र गुह्याद्गुह्यतरं महत् ।

यस्य स्मरणमात्रेण मुच्यते सर्वबन्धनात् ॥

दत्तं सनातनं ब्रह्म निर्विकारं निरञ्जनम् ।

आदिदेवं निराकारं व्यक्तं गुणविवर्जितम् ॥

नामरूपक्रियातीतं निस्सङ्गं देववन्दितम् ।

नारायणं शिवं शुद्धं दृश्यदर्शनवन्दितम् ॥

परेशं पार्वतीकान्तं रमाधीशं दिगम्बरम् ।

निर्मलो नित्यतृप्तात्मा नित्यानन्दो महेश्वरः ॥

ब्रह्मा विष्णुः शिवः साक्षाद्गोविन्दो गतिदायकः ।

पीताम्बरधरो देवो माधवस्सुरसेवितः ॥

मृत्युञ्जयो महारुद्रः कार्तवीर्यवरप्रदः ।

ओमित्येकाक्षरं बीजं क्षराक्षरपदं हरिम् ॥

गया काशी कुरुक्षेत्रं प्रयागं बद्रिकाश्रमम् ।

एतत्सर्वं कृतं तेन दत्त इत्यक्षरद्वयम् ॥

गौतमी जाह्नवी भीमा गण्डकी च सरस्वती ।

एतत्सर्वं कृतं तेन दत्त इत्यक्षरद्वयम् ॥

सरयू तुङ्गभद्रा च यमुना पयवाहिनी ।

एतत्सर्वं कृतं तेन दत्त इत्यक्षरद्वयम् ॥

ताम्रपर्णी प्रणीता च गोमती तापनाशिनी ।

एतत्सर्वं कृतं तेन दत्त इत्यक्षरद्वयम् ॥

नर्मदा सिन्धु कावेरी कृष्णवेणी तथैव च ।

एतत्सर्वं कृतं तेन दत्त इत्यक्षरद्वयम् ॥

अवन्ती द्वारका माया मल्लिनाथस्य दर्शनम् ।

एतत्सर्वं कृतं तेन दत्त इत्यक्षरद्वयम् ॥

अयोध्या मथुरा काञ्ची रेणुका सेतुबन्धनम् ।

एतत्सर्वं कृतं तेन दत्त इत्यक्षरद्वयम् ॥

द्वादशं ज्योतिलिङ्गं च वाराहे पुष्करे तथा ।

एतत्सर्वं कृतं तेन दत्त इत्यक्षरद्वयम् ॥

ज्वालामुखी हिङ्गुला च सप्तशृङ्गी तथैव च ।

एतत्सर्वं कृतं तेन दत्त इत्यक्षरद्वयम् ॥

अहोबिलं त्रिपथगां गङ्गासागरमेव च ।

एतत्सर्वं कृतं तेन दत्त इत्यक्षरद्वयम् ॥

करवीरं महास्थानं रङ्गनाथस्तथैव च ।

एतत्सर्वं कृतं तेन दत्त इत्यक्षरद्वयम् ॥

शाकम्भरी च मूकाम्बा कार्तिकस्वामि दर्शनम् ।

एतत्सर्वं कृतं तेन दत्त इत्यक्षरद्वयम् ॥

एकादशीव्रतं चैव अष्टाङ्गं योगसाधनम् ।

एतत्सर्वं कृतं तेन दत्त इत्यक्षरद्वयम् ॥

व्रतं निष्ठा तपो दानं सामगानं तथैव च ।

एतत्सर्वं कृतं तेन दत्त इत्यक्षरद्वयम् ॥

मुक्तिक्षेत्रं च कामाक्षी तुलजा सिद्धदेवता ।

एतत्सर्वं कृतं तेन दत्त इत्यक्षरद्वयम् ॥

अन्नहोमादिकं दानं मेदिन्याश्च गजो वृषः ।

एतत्सर्वं कृतं तेन दत्त इत्यक्षरद्वयम् ॥

माघकार्तीकयोः स्नानं सन्न्यासं ब्रह्मचर्यकम् ।

एतत्सर्वं कृतं तेन दत्त इत्यक्षरद्वयम् ॥

अश्वमेधसहस्राणि मातापितृप्रपोषणम् ।

एतत्सर्वं कृतं तेन दत्त इत्यक्षरद्वयम् ॥

अमितं पोषणं पुण्यमुपकारं तथैव च ।

एतत्सर्वं कृतं तेन दत्त इत्यक्षरद्वयम् ॥

जगन्नाथं च गोकर्णं पाण्डुरङ्गं तथैव च ।

एतत्सर्वं कृतं तेन दत्त इत्यक्षरद्वयम् ॥

सर्वदेवनमस्कारः सर्वयज्ञाः प्रकीर्तिताः ।

एतत्सर्वं कृतं तेन दत्त इत्यक्षरद्वयम् ॥

षट्छास्त्राणि पुराणानि अष्टौ व्याकरणानि च ।

एतत्सर्वं कृतं तेन दत्त इत्यक्षरद्वयम् ॥

सावित्रीं प्रणवं जप्त्वा चतुर्वेदांश्च पारगाः ।

एतत्सर्वं कृतं तेन दत्त इत्यक्षरद्वयम् ॥

कन्यादानादि पुण्यानि वानप्रस्थस्य पोषणम् ।

एतत्सर्वं कृतं तेन दत्त इत्यक्षरद्वयम् ॥

वापीकूपतटाकानि काननारोपणानि च ।

एतत्सर्वं कृतं तेन दत्त इत्यक्षरद्वयम् ॥

अश्वत्थं तुलसीं धात्रीं सेवते यो नरस्सदा ।

एतत्सर्वं कृतं तेन दत्त इत्यक्षरद्वयम् ॥

शिवं विष्णुं गणेशानं शक्तिं सूर्यं च पूजनम् ।

एतत्सर्वं कृतं तेन दत्त इत्यक्षरद्वयम् ॥

गोहत्यादि सहस्राणि ब्रह्महत्यास्तथैव च ।

मुच्यते सर्वपापेभ्यो दत्त इत्यक्षरद्वयम् ॥

स्वर्णस्तेयं सुरापानं मातुर्गमनकिल्बिषम् ।

मुच्यते सर्वपापेभ्यो दत्त इत्यक्षरद्वयम् ॥

स्त्रीहत्यादिकृतं पापं बालहत्यास्तथैव च ।

मुच्यते सर्वपापेभ्यो दत्त इत्यक्षरद्वयम् ॥

प्रायश्चित्तं कृतं तेन सर्वपापप्रणाशनम् ।

ब्रह्मत्वं लभते ज्ञानं दत्त इत्यक्षरद्वयम् ॥

कलिदोषविनाशार्थं जपेदेकाग्रमानसः ।

श्रीगुरुं परमानन्दं दत्त इत्यक्षरद्वयम् ॥

दत्त दत्त इदं वाक्यं तारकं सर्वदेहिनाम् ।

श्रद्धायुक्तो जपेन्नित्यं दत्त इत्यक्षरद्वयम् ॥

केशवं माधवं विष्णुं गोविन्दं गोपतिं हरिम् ।

गुरूणां पठ्यते विद्वानेतत्सर्वं शुभावहम् ॥

निरञ्जनं निराकारं देवदेवं जनार्दनम् ।

मायायुक्तं जपेन्नित्यं पावनं सर्वदेहिनाम् ॥

आदिनाथं सुरश्रेष्ठं कृष्णं श्यामं जगद्गुरुम् ।

सिद्धराजं गुणातीतं रामं राजीवलोचनम् ॥

नारायणं परं ब्रह्म लक्ष्मीकान्तं परात्परम् ।

अप्रमेयं सुरानन्दं नमो दत्तं दिगम्बरम् ॥

योगिराजोऽत्रिवरदस्सुराध्यक्षो गुणान्तकः ।

अनसूयात्मजो देवो देवतागतिदायकः ॥

गोपनीयः प्रयत्नेन अयं सुरमुनीश्वरैः ।

समस्तत्रऋषिभिस्सुरैः भक्त्या स्तुत्या महात्मभिः ॥

नारदेन सुरेन्द्रेण सनकाद्यैर्महात्मभिः ।

गौतमेन च गर्गेण व्यासेन कपिलेन च ॥

वामदेवेन दक्षेण अत्रिभार्गवमुद्गलैः ।

वसिष्ठप्रमुखैस्सर्वैः गीयते सर्वमादरात् ॥

विनायकेन रुद्रेण स्वामिना कार्तिकेन च ।

मार्कण्डेयेन धौम्येन कीर्तितं स्तवमुत्तमम् ॥

मरीच्यादि मुनीन्द्रैश्च शुककर्दमसत्तमैः ।

अङ्गिराकृतपौलस्त्यभृगुकश्यपजैमिनिः ॥

गुरोः स्तवममधीयानो विजयी सर्वदा भवेत् ।

गुरुसायुज्यमाप्नोति गुरुनाम पठेद्बुधः ॥

गुरोः परतरं नास्ति सत्यं सत्यं न संशयः ।

गुरोः पादोदकं पीत्वा गुरोर्नाम सदा जपेत् ॥

तेऽपि सन्न्यासिनो ज्ञेया इतरे वेषधारिणः ।

गङ्गाद्यास्सरितस्सर्वा गुरुपादाम्बुजे स्थिताः ॥

गुरुस्तवं न जानाति गुरुनाम मुखे न हि ।

पशुतुल्यं विजानीयात्सत्यं सत्यं महामुने ॥

इदं स्तोत्रं महद्दिव्यं स्तवराजं मनोहरम् ।

पठनाच्छ्रवणाद्ध्यानात्सर्वान्कामानवाप्नुयात् ॥

॥ इति रुद्रयामले शुक ईश्वरसंवादे दत्तात्रेय स्तवराजस्तोत्रम् ॥

Sri Kamakoti Mandali [srigurupaduka@yahoo.com]